# ॥ आदित्यहृदयम् ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राम्-अगस्त्यो भगवान् ऋषिः ॥ २ ॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥ ३ ॥

आदित्यहृदयं पुण्यं सर्व शत्रु -विनाशनम् ।
जयावहं जपेन्नित्यम्-अक्षय्यं परमं शिवम् ॥ ४ ॥

सर्वमङ्गल -माङ्गल्यं सर्व पाप -प्रणाशनम् ।
चिन्ता शोक-प्रशमनम्-आयुर्वर्धन-मुत्तमम् ॥५ ॥

रश्मिमन्तं समुद्यन्तं देवासुर - नमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥

सर्व देवात्मको ह्येष तेजस्वी रश्मि-भावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥ ८ ॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्-वह्निः प्रजा प्राण ऋतुकर्ता प्रभाकरः ॥९ ॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुस् - स्वर्णरेता दिवाकरः ॥ १० ॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्-मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥

व्योमनाथस्-तमोभेदी ऋग्यजुस्सामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः ॥१३ ॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥१४ ॥

नक्षत्रग्रहताराणाम्-अधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते॥ १५॥

ओं  नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्-गणानां पतये दिनाधिपतये नमः॥ १६॥

ओं जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥ १७॥

ओं नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः॥१८॥

ओं ब्रह्मेशानाच्युतेशाय सूर्यायादित्य वर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥१९॥

ओं तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥ २०॥

ओं तप्तचामीकराभाय वह्नये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥ २१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥ २२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥ २३॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः॥ २४॥

## ॥ फलश्रुतिः॥

एनम्-आपत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥२५॥

पूजयस्वैनम्-एकाग्रो देवदेवं जगत्पतिम्।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥२६॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम्॥ २७॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८ ॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३० ॥

अथ रविर्-अवदत्-निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।

निशिचरपति-संक्षयं विदित्वा सुरगण-मध्यगतो  वचस्त्वरेति ॥३१ ॥

## || ādityahṛdayam ||

tato yuddhapariśrāntaṁ samare cintayā sthitam |
rāvaṇaṁ cāgrato dṛṣṭvā yuddhāya samupasthitam || 1 ||

daivataiśca samāgamya draṣṭumabhyāgato raṇam |
upāgamyābravīdrām-agastyo bhagavān ṛṣiḥ || 2 ||

rāma rāma mahābāho śṛṇu guhyaṁ sanātanam |
yena sarvānarīn vatsa samare vijayiṣyasi || 3 ||

ādityahṛdayaṁ puṇyaṁ sarva śatru vināśanam |
jayāvahaṁ japennitym-akṣayyaṁ paramaṁ śivam || 4 ||

sarvamaṅgala-māṅgalyaṁ sarva pāpa-praṇāśanam |
cintā śoka-praśamanam-āyurvardhana-muttamam ||5 ||

raśmimantaṁ samudyantaṁ devāsura - namaskṛtam |
pūjayasva vivasvantaṁ bhāskaraṁ bhuvaneśvaram || 6 ||

sarva devātmako hyeṣa tejasvī raśmi-bhāvanaḥ |
eṣa devāsuragaṇān lokān pāti gabhastibhiḥ || 7 ||

eṣa brahmā ca viṣṇuśca śivaḥ skandaḥ prajāpatiḥ |
mahendro dhanadaḥ kālo yamaḥ somo hyapāmpatiḥ || 8 ||

pitaro vasavaḥ sādhyā hyaśvinau maruto manuḥ |
vāyur-vahniḥ prajā prāṇa ṛtukartā prabhākaraḥ ||9 ||

ādityaḥ savitā sūryaḥ khagaḥ pūṣā gabhastimān |
suvarṇasadṛśo bhānuḥ - svarṇaretā divākaraḥ || 10 ||

haridaśvaḥ sahasrārciḥ saptir-marīcimān |
timironmathanaḥ śambhustvaṣṭā mārtāṇḍa aṁśumān || 11 ||

hiraṇyagarbhaḥ śiśirastapano bhāskaro raviḥ |
agnigarbho'diteḥ putraḥ śaṅkhaḥ śiśiranāśanaḥ || 12 ||

vyomanāths-tamobhedī ṛgyajussāmapāragaḥ |
ghanavṛṣṭirapāṁ mitro vindhyavīthīplavaṅgamaḥ ||13 ||

ātapī maṇḍalī mṛtyuḥ piṅgalaḥ sarvatāpanaḥ |
kavirviśvo mahātejāḥ raktaḥ sarvabhavodbhavaḥ ||14 ||

nakṣatragrahatārāṇām-adhipo viśvabhāvanaḥ |
tejasāmapi tejasvī dvādaśātmannamo'stu te || 15 ||

oṁ  namaḥ pūrvāya giraye paścimāyādraye namaḥ |
jyotir-gaṇānāṁ pataye dinādhipataye namaḥ || 16 ||

oṁ jayāya jayabhadrāya haryaśvāya namo namaḥ |
namo namaḥ sahasrāṁśo ādityāya namo namaḥ || 17 ||

oṁ nama ugrāya vīrāya sāraṅgāya namo namaḥ |
namaḥ padmaprabodhāya mārtāṇḍāya namo namaḥ ||18 ||

oṁ brahmeśānācyuteśāya sūryāyāditya varcase |
bhāsvate sarvabhakṣāya raudrāya vapuṣe namaḥ ||19 ||

oṁ tamoghnāya himaghnāya śatrughnāyāmitātmane |
kṛtaghnaghnāya devāya jyotiṣāṁ pataye namaḥ || 20 ||

oṁ taptacāmīkarābhāya vahnaye viśvakarmaṇe |
namastamo'bhinighnāya rucaye lokasākṣiṇe || 21 ||

nāśayatyeṣa vai bhūtaṁ tadeva sṛjati prabhuḥ |
pāyatyeṣa tapatyeṣa varṣatyeṣa gabhastibhiḥ || 22 ||

eṣa supteṣu jāgarti bhūteṣu pariniṣṭhitaḥ |
eṣa evāgnihotraṁ ca phalaṁ caivāgnihotriṇām || 23 ||

vedāśca kratavaścaiva kratūnāṁ phalameva ca |
yāni kṛtyāni lokeṣu sarva eṣa raviḥ prabhuḥ || 24 ||

**|| phalaśrutiḥ ||**

enam-āpatsu kṛcchreṣu kāntāreṣu bhayeṣu ca |
kīrtayan puruṣaḥ kaścinnāvasīdati rāghava ||25 ||

pūjayasvainam-ekāgro devadevaṁ jagatpatim |
etat triguṇitaṁ japtvā yuddheṣu vijayiṣyasi ||26 ||

asmin kṣaṇe mahābāho rāvaṇaṁ tvaṁ vadhiṣyasi |
evamuktvā tadāgastyo jagāma ca yathāgatam || 27 ||

etacchrutvā mahātejā naṣṭaśoko'bhavattadā |
dhārayāmāsa suprīto rāghavaḥ prayatātmavān ||28 ||

ādityaṁ prekṣya japtvā tu paraṁ harṣamavāptavān |
trirācamya śucirbhūtvā dhanurādāya vīryavān ||29 ||

rāvaṇaṁ prekṣya hṛṣṭātmā yuddhāya samupāgamat |
sarvayatnena mahatā vadhe tasya dhṛto'bhavat ||30 ||

atha ravir-avadat-nirīkṣya rāmaṁ muditamanāḥ paramaṁ
prahṛṣyamāṇaḥ |

niśicarapati-saṅkṣayaṁ viditvā suragaṇa-madhyagato
vacastvareti ||31 ||